# શ્રીગણેશસ્તોત્રમ્

Shri Ganesha Stotram

sanskritdocuments.org

April 22, 2018

# Shri Ganesha Stotram

# શ્રીગણેશસ્તોત્રમ્

## Sanskrit Document Information

Text title : vighnahartre gaNeshastotram

File name : gaNeshastotramvighnahartre.itx

Category : ganesha

Location : doc_ganesha

Transliterated by : Jonathan Wiener wiener78 at sbcglobal.net

Proofread by : Jonathan Wiener, NA, PSA Easwaran

Description-comments : Path Pustakam 1934 Srinagar Kashmir Mercantile Press

Source : Adityapurana

Latest update : April 22, 2018

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

April 22, 2018

*sanskritdocuments.org*

# શ્રીગણેશસ્તોત્રમ્

ॐ નમો વિઘ્નહર્ત્રે ।
ॐ અપ્રમેયગુણં નિત્યં ગણેશમમરોત્તમમ્ ।
વેદાન્તવેદ્યં સર્વજ્ઞં પૂજિતમમરેશ્વરૈઃ ॥ ૧॥

ઓઙ્કારં પરમંબ્રહ્મ અક્ષરં શિવમવ્યયમ્ ।
પાર્વતીપ્રિયપુત્રં તં પ્રણમામિ ગણેશ્વરમ્ ॥ ૨॥

બ્રહ્મદ્વયાનવચ્છેદ્યં શિવાદ્વયવિબોધિતમ્ ।
સ્વપ્રકાશં પરાત્માનં તં પ્રપદ્યે વિનાયકમ્ ॥ ૩॥

વૈરિવિઘ્નપ્રદં નિત્યં ભક્તાનાં સિદ્ધિદાયકમ્ ।
શિવસૂનું પરાનન્દં નમસ્યામિ વિનાયકમ્ ॥ ૪॥

મોદકાહારપરમમક્ષમાલાકરં પરમ્ ।
ત્રિનેત્રં ગજવક્ત્રં ચ તં પ્રપદ્યે ગણેશ્વરમ્ ॥ ૫॥

સ્વદન્તં પરુશું ચૈવ ધારયન્તં ભુજદ્વયે ।
રક્તવસ્ત્રામ્બરધરં રક્તમાલાધરં વિભુમ્ ॥ ૬॥

વિઘ્નરાશીન્વિકિરન્તં કરક્ષેપૈર્મુહુર્મુહુઃ ।
અનન્તં પરમં તત્ત્વં સારાત્સારતરં પરમ્ ॥ ૭॥

અપ્રમેયગુણાયાપિ ત્ર્યક્ષાય વરવર્ણિને ।
વિનાયકાય દેવાય ભૂયો ભૂયો નમો નમઃ ॥ ૮॥

શ્રીગણેશં નુમો યસ્ય પ્રસાદાત્પ્રાપ્તબુદ્ધયઃ ।
પ્રૌઢબુદ્ધિષુ હૃષ્યન્તિ માદૃશા અપિ વાલિશાઃ ॥ ૯॥

શ્રીગણેશ્વરં ભક્તકામદં શ્રીકૃપાનિધિં સર્વસિદ્ધિદમ્ ।
બ્રહ્મવિષ્ણુદેવેન્દ્રગોનુતં ભક્તવત્સલં નૌમ્યુમાસુતમ્ ॥ ૧૦॥

વારણાનનં વારણાધિપદારુણં બલાત્સિદ્ધિકારણમ્ ।

તારણં ભવાદ્વિઘ્નવારણં ભક્તવત્સલં નૌમ્યુમાસુતમ્ ॥ ૧૧॥

શઙ્કરાઙ્કુતોઽવાતરન્મુદા શૈલજાગ્રતો હર્ષયન્નુભૌ ।
ષણ્મુખેન યો નૃત્યતે ગિરૌ ભક્તવત્સલં તં નમામ્યહમ્ ॥ ૧૨॥

શૈલજાસુતં વિશ્વમોહનં ભક્તવત્સલં કલ્મષાપહમ્ ।
સિદ્ધિદાયકં વિઘ્નનાશકં નૌમ્યહં સુરૈર્વન્દ્યપાદુકમ્ ॥ ૧૩॥

શ્રીતપસ્વિનોઽચિન્ત્યપૌરુષં યં વિચિન્ત્ય પ્રાક્સર્વસિદ્ધિદમ્ ।
સિદ્ધવાઞ્છિતાસ્તે ભવન્તિ તં ભક્તવત્સલં નૌમ્યુમાસુતમ્ ॥ ૧૪॥

યત્પદાબ્જપીઠાસનઙ્ગણૈર્મૌલિકોટિભિર્વન્દિતં મુહુઃ ।
પ્રાપ્તસિદ્ધયસ્તે ભવન્તિ તં ભક્તવત્સલં નૌમ્યુમાસુતમ્ ॥ ૧૫॥

દૈવતૈર્દિતેરાત્મજૈર્નરૈર્નાગચારણૈર્ભૂતકિન્નરૈઃ ।
ગુહ્યકાદિભિર્વન્દિતં સદા ભક્તવત્સલં નૌમ્યુમાસુતમ્ ॥ ૧૬॥

ચિન્તિતં નરૈઃ સિદ્ધનાયકૈર્મુક્તયેબ્જજેનાપિ સૃષ્ટયે ।
ત્રૈપુરં ચ હન્તું શિવેન વૈ ભક્તવત્સલં નૌમ્યુમાસુતમ્ ॥ ૧૭॥

પાહિ પાહિ માં વિઘ્નનાયક રક્ષ રક્ષ માં વિઘ્નનાશક ।
દેવ દેવ ત્વાં વિશ્વપૂજિત ભક્તવત્સલં નૌમ્યુમાસુતમ્ ॥ ૧૮॥

પાહિ માં વિભો દીનપાલક રક્ષ માં પ્રભો દીનવત્સલ ।
દેહિ સમ્પદં હ્યાપદં હર ભક્તવત્સલં નૌમ્યુમાસુતમ્ ॥ ૧૯॥

યોઽભ્યર્ચિતઃ સુરગણૈર્વરસિદ્ધિહેતો-
    શ્છેત્તું ભયાનિ ચ કરે પરુશું દધાનઃ ।
દેવઃ સ શમ્ભુદયિતાપરિવર્દ્ધિતશ્રી-
    વિઘ્નાન્નિવારયતુ વારણરાજવક્ત્રઃ ॥ ૨૦॥

નમતાશેષવિઘ્નૌઘવારણં વારણાનનમ્ ।
કારણં સર્વસિદ્ધીનાં દુરિતાર્ણવતારણમ્ ॥ ૨૧॥

ઇતિ ગણેશસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded by Jonathan Wiener wiener78 at sbcglobal.net

Proofread by Jonathan Wiener, PSA Easwaran

*Shri Ganesha Stotram*

pdf was typeset on April 22, 2018

Please send corrections to *sanskrit@cheerful.com*